# पाठ -६
# राजते खलु कन्याकुमारी

**सारान्शः**

तमिलनाडुराज्ये भारतस्य दक्षिणे कोणे कन्याकुमारी नामकं प्रसिद्धं तीर्थम् अस्ति। अत्र त्रयः समुद्राः मिलन्ति । 'कन्याकुमारी' इति नामविषये अनेकाः कथाः सन्ति बाणासुरवधः, भरतस्य राज्यप्रदानम् इति प्रमुखे कथे। अस्मिन् मन्दिरे नवरात्रपूजनं, शोभायात्रायाः आयोजनं भव्यं भवति ।
दक्षिणसमुद्रे एकस्मिन् द्वीपे विवेकानन्दस्मारकः अस्ति । अत्र ध्यानप्रकोष्ठे ॐ इति चित्रम् अस्ति । अत्र जनाः ध्यानं कुर्वन्ति । अत्रैव तिरुक्कुरलप्रणेतुः तिरुवल्लुवरस्य अपि प्रतिमा अस्ति। एकेन पदेन तिष्ठन्ती कन्याकुमारीप्रतिमा अपि अत्र विराजते। समुद्रस्य जलं सूर्योदये स्वर्णमयं भवति । सागराः शंखमालाः शक्तिमालाः च समर्पयन्ति ।

**मुख्य बिन्दवः**

कन्याकुमारी इति तीर्थस्थानं जगत्प्रसिद्धम् अस्ति। अत्र प्रमुखदर्शनीयस्थानम् अस्ति 'विवेकानन्दस्मारकम् यत् 1970 तमे वर्षे स्थापितम् अभवत् । कन्याकुमारीतः यन्त्रचालितया नौकया स्मारकं प्रति गन्तुं शक्यते । तिरुक्कुरल् नामकः ग्रन्थः तमिलुवेदः अपि कथ्यते। तिरुवल्लुरस्य प्रतिमायाः पदतलं प्राप्य नमस्कृत्य ततः पुनः नौका स्मारकं प्रति गच्छति । स्मारकस्य एकस्मिन् भागे विवेकानन्दसाहित्यस्य वेदान्तसाहित्यस्य विक्रयव्यवस्था अपि अस्ति ।स्मारके यदा कदाचित् विशाला प्रदर्शनी अपि आयोज्यते । तत्र संस्कृतनाटकादीनां मंचनम् अपि भवति ।

**अवगच्छामः**

भारतं नाम देवभूमिः । भारतस्य उत्तरे मुकुटशिरोमणिः हिमालयो नाम नगाधिराजः विराजते । दक्षिणे त्रयः समुद्राः भारतभूमेः पादप्रक्षालनं कुर्वन्ति । तत्र सागराणां सङ्गमस्थले एव कन्याकुमारी नाम क्षेत्रम् अस्ति अस्य दिव्यस्थानस्य दर्शनेन स्वामिविवेकानन्दः अपि प्रभावितः जातः अतः सः समुद्रं तीर्त्वा एव एतत् द्वीपम् उपागच्छत् । अस्य स्थानस्य ऐतिहासिक भौगोलिकं सामाजिकं च गौरवं वर्तते। प्रकृतेः सौन्दर्यं तु अवर्णनीयम्।

**आवश्यकोऽयं ज्ञानम्**

हिमालयः एकः पर्वतः अस्ति । अयं पर्वतेषु महान् पर्वतः अस्ति। अत एव अयं पर्वतराज उच्यते। अस्मिन् पर्वते हिमस्य अधिकता अस्ति। तेन अस्य हिमालय इति नाम अस्ति । अयं पर्वतः उत्तरदिशायाम् अस्ति। अस्य अनेकानि शिखराणि अतीव उच्चतमानि सन्ति। अस्य गौरीशंकरनामाकं शिखरं संसारस्य सर्वेषु शिखरेषु उच्चतमं मन्यते । अयं पर्वतः भारतस्य उत्तर्दिशायाः महाबलवान् प्रहरी अस्ति । अत्र नानाविधा वनस्पतयः विविधानि फलानि तथा नानाप्रकारणि खाद्यवस्तूनि च उपलभ्यते। अस्मिन् पर्वते अनेकानि तीर्थस्थानानि च सन्ति। बहूनां मुनीनां तपोवनानि विद्यन्ते । अत एव संस्कृतग्रंथेषु हिमालयस्य अतीव महत्वपूर्ण वर्णनं मिलति ।

**योग्यतां वर्धयत**

आधुनिकभारतस्य निर्माणकर्तृषु युगपुरुषस्य विवेकानन्दस्य नाम सर्वोपरि अस्ति। सः न केवलं भारते अपितु सम्पूर्णविश्वे आध्यात्मलोकं विकीर्णयति स्म। तस्य महापुरुषस्य जन्म 1863 तमे वर्षे अभवत्। विश्वनाथदत्तः तस्य पिता आसीत्। बाल्यकाले विवेकानन्दस्य नाम नरेंद्रनाथः आसीत्। बाल्यकालादेव सः अति मेधावी आसीत्। आध्यात्मविषये तस्य महती रुचिः आसीत्। नरेन्द्रः यदा स्नातकोऽभवत् तदा तस्य पिता परलोकम् अगच्छत्। एकदा एकस्यां सभायां सः रामकृष्णपरमहंसमहोदयस्य स्पर्शमधिगत्य समाधिस्थोऽभवत्। तस्यैव गुरोः स्पर्शेन च तस्य समाधिः समाप्तोऽभवत्। तस्मात् क्षणादेव नरेन्द्रः तं स्वगुरुम् अमन्यत तपः च आरभत।
1893 तमे वर्षे अमरीकादेशे 'शिकागो' नामनगरे विश्वधर्मसम्मेलनमभवत्। तस्मिन् सम्मेलन सः भारतस्य प्रतिनिधित्वम् अकरोत्। तस्मादेव कालात् तस्य कीर्तिः सर्वत्र प्रासरत्। अनेके जनाः तस्य भक्ताः अभवन्। विवेकानन्दः लोकसेवायाः उद्देश्यं 'रामकृष्णमिशन' संस्थापयत्। 4 जुलाई 1902 तमे वर्षे अयं दिव्यपुरुषः पंचतत्वं गतः।

**व्याकरण बिन्दवः शब्द भण्डाराश्च**

**क्त- क्तवतुः**- क्त (त), क्तवतु (तवत्) प्रत्ययौ भूतकालिक प्रत्ययौ । 'क्त' प्रत्ययस्य प्रयोगः प्रायः कर्मवाच्ये, भाववाच्ये च भवति, क्तवतु प्रत्ययस्य प्रयोगः कर्तृवाच्ये भवति । विशेषणरूपे अपि अनयोः प्रयोगः भवति अतः त्रिषु लिङ्गेषु एतयोः प्रयोगः भवति ।यथा- क्त- तेन फलं खादितम् ।

क्तवतु- गृहं गतवान् बालः। (पु.)

गृहं गतवती बाला। (स्त्री.)

**कर्मधारयः** -तत्पुरुषस्य भेदः कर्मधारयः । कर्मधारयस्य भेदः द्विगुः ।

कर्मधारयसमासे पदद्वयं भवति, परम् उभयोः पदयोः लिङ्ग, वचनं, विभक्तिश्च समाना भवति । अत्र विशेष्य-विशेषणयोर्मध्ये, उपमान उपमोययोर्मध्ये च समासः भवति । कर्मधारयः अपि सप्तविधः भवति।

कर्मधारयः -

तत्पुरुषस्य भेदः कर्मधारयः । कर्मधारयस्य भेदः द्विगुः ।

कर्मधारयसमासे पदद्वयं भवति, परम् उभयोः पदयोः लिङ्गं, वचनं, विभक्तिश्च समाना भवति । अत्र विशेष्य-विशेषणयोर्मध्ये, उपमान-उपमोययोर्मध्ये च समासः भवति । कर्मधारयः अपि सप्तविधः भवति।

| क्र. | प्रकारः | विग्रहवाक्यम् | समस्तं पदम् |
|---|---|---|---|
| 1 | विशेषणपूर्वपदम् | नीलम् उत्पलम्<br>पीतम् अम्बरम् | नीलोत्पलम्<br>पीताम्बरम् |
| 2 | विशेष्यपूर्वपदम् | वैयाकरणानां खसूचिः | वैयाकरणखसूचिः<br>मयूरव्यंसकः |
| 3 | विशेषणोभयपदम् | पूर्वं स्नातः पश्चात् अनुलिप्तः | स्नातानुलिप्तः<br>पीतप्रतिबद्धः |
| 4 | उपमानपूर्वपदम् | घन इव श्यामः<br>कर्पूर इव गौरः | घनश्यामः<br>कर्पूरगौरः |
| 5 | उपमानोत्तरपदम् | पुरुषः व्याघ्र इव<br>कर इव किसलयः | पुरुषव्याघ्रः<br>करकिसलयः |
| 6 | सम्भावना पूर्वपदम् | गुण इव बुद्धिः<br>आलोक इव शब्दः | गुणबुद्धिः<br>आलोकशब्दः |
| 7 | अवधारणपूर्वपदम् | विद्या एव धनम्<br>क्षमा एव शस्त्रम् | विद्याधनम्<br>क्षमाशस्त्रम् |

**शब्दार्थाः**

**सङ्गमे** = मिलने के स्थान पर

**प्रार्थितवन्तः** = प्रार्थना की

**तपः आचरन्ती** = तपस्या करती हुई

**शिलामये द्वीपे**=शिला से निर्मित द्वीप पर

**भविष्यविषये** = भविष्य के विषय में

**नीलजलधेः** = नीले सागर की

**असंख्यशुक्तिमालाः** = असंख्य सीपियों की मालाएँ।

**समर्पयन्ति**=समर्पित करती हैं

**पाठ संप्रेष्यः**

1. भारतस्य दक्षिणे भागे 'कन्याकुमारी' नाम्नः स्थलस्य विषये अनेकाः कथाः प्रचलिताः ।
2. कन्याकुमार्याः मन्दिरे नवरात्रदिनेषु विशेषपूजाः शोभायात्राः च आयोज्यन्ते ।
3. दक्षिणसमुद्रे शिलामयद्वीपे विवेकानन्दस्य स्मारकं वर्तते ।
4. 'तिरुवल्लुवरप्रतिमा', 'श्रीपादशिला' च अपि प्रसिद्धे।
5. एकस्मात् स्थानात् एव सूर्योदयः सूर्यास्तः च द्रष्टुं शक्यते।
6. क्त, क्तवतु भूतकालिक कृत् प्रत्ययौ ।
7. तत्पुरुषसमासे उत्तरपदं प्रधानं भवति । समासे विग्रहस्य अवस्थायां पूर्वपदस्य विभक्तेः लोपः भवति ।
8. क्त्वा, ल्यप्, तुमुन् प्रत्ययानां योगेन अव्ययपदानि भवन्ति ।
9. ईकारान्तस्त्रीलिङ्ग इकारान्त स्त्रीलिङ्ग शब्दरचनयोः भेदः ज्ञातः ।
10. परितः योगे द्वितीया, पुरतः, उपरि, पार्श्वे योगे च षष्ठी उपपदविभक्तिः भवति। 11. टाप् (आ) ङीप् (ई) स्त्रीवाचक प्रत्ययौ ।

**अधिकाङ्क्षानाम् अर्जनं कथं भवेत्**

- पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात्।
- अध्यायस्य समनार्थी पद्य सूक्तयः अपि जानीयात्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत।
- भारतस्य मानचित्रस्य निर्माणं कृत्वा तीर्थ स्थलानां संकेतं कुरुत नामानि च लिखत।